# Shri Pragajibhaktamahima Ashtakam

# શ્રીપ્રાગજીભક્તમહિમાષ્ટકમ્

## Document Information

Text title : Shri Pragajibhaktamahima Ashtakam

File name : prAgajIbhaktamahimAShTakam.itx

Category : deities_misc, svAminArAyaNa, gurudev, aShTaka

Location : doc_deities_misc

Author : yajnapuruShadAsajImahAraja

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

Shri Pragajibhaktamahima Ashtakam

# શ્રીપ્રાગજીભક્તમહિમાષ્ટકમ્

(રથોદ્ધતા છન્દ)
જ્ઞાનધર્મ-સુવિરક્તિ-શાલિનં
શ્રીહરૌ રતિવિશિષ્ટ-માનસમ્ ।
ધર્મયુક્ત-પુરુષાધિક-પ્રિયં
પ્રાગ્જિતં ગુરુમહં નમામિ તમ્ ॥ ૧॥

બ્રહ્મરૂપ-મખિલાર્થદં વિભું
યોગયુક્ત-મુરુપુણ્ય-સઙ્ગતમ્ ।
સ્વપ્રતાપ-નિહતાખિલાસુરં
પ્રાગ્જિતં ગુરુમહં નમામિ તમ્ ॥ ૨॥

દિવ્યનિર્ગુણ-મનોરમાકૃતિં
નૈકકોટિ-રવિચન્દ્ર-ભાસુરમ્ ।
દ્રષ્ટમાત્ર-નરનાટકં સદા
પ્રાગ્જિતં ગુરુમહં નમામિ તમ્ ॥ ૩॥

અક્ષરાધિપતિ-તુલ્યતાં ગતં
સ્વાન્તરે હિ હરિમૂર્તિદર્શિતમ્ ।
સર્વજીવ-હૃદયસ્થ-વેદનં
પ્રાગ્જિતં ગુરુમહં નમામિ તમ્ ॥ ૪॥

જન્મમૃત્યુ-ભવબન્ધમોક્ષણં
પ્રાજ્યશિષ્ય-શુચિબોધકં મુદા ।
સ્વાશ્રિતામિતજનૈઃ સુપૂજિતં
પ્રાગ્જિતં ગુરુમહં નમામિ તમ્ ॥ ૫॥

કૃષ્ણશાસન-વિલમ્બનારુચિં
દુષ્ટલોક-વિકૃતાનય-ક્ષમમ્ ।
માનમત્સર-નરા-વિબોધિતં

પ્રાગ્જિતં ગુરુમહં નમામિ તમ્ ॥ ૬॥

ઇન્દ્રિયાશ્વ-વિજિતં ક્ષમાભૃતં
કામદોષ-દહને પટું ભૃશમ્ ।
નિર્નિમેષ-નયનં પરાપહં
પ્રાગ્જિતં ગુરુમહં નમામિ તમ્ ॥ ૭॥

ભૂરિ કોમલસુધા-સમાક્ષરં
દ્રગ્વિલાસ-હૃત-ભક્તચેતસમ્ ।
નીલકણ્ઠ-સુતતુલ્ય-વિગ્રહં
પ્રાગ્જિતં ગુરુમહં નમામિ તમ્ ॥ ૮॥

(શાર્દૂલવિક્રીડિતમ્)
શ્રીમન્નિર્ગુણ-મૂર્તયે ચ વિભવે જ્ઞાનોપદેષ્ટ્રે સદા
સર્વજ્ઞાય સમગ્ર-સાધુગુણિને માયાપરાય સ્વયમ્ ।
સર્વૈશ્વર્યવતે નિજાશ્રિતજનાનાં દોષહર્ત્રે ચ મે
પ્રાગ્જિત્-સદ્ગુરવે નમોસ્તુ સતતં બ્રહ્માત્મમુક્તાયતે ॥ ૯॥

ઇતિ સ્વામી યજ્ઞપુરુષદાસજીમહારજવિરચિતં
શ્રીપ્રાગજીભક્તમહિમાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Pragajibhaktamahima Ashtakam*
pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*